IJRAR.ORG E-ISSN: 2348-1269, P-ISSN: 2349-5138

INTERNATIONAL JOURNAL OF RESEARCH AND ANALYTICAL REVIEWS (IJRAR) | IJRAR.ORG

An International Open Access, Peer-reviewed, Refereed Journal

# कर्मादिकारकेषु कारकान्तरविवक्षा

**Pradip Mandal**
Research Scholar
Rabindra Bharati University, Kolkata

आचार्य पाणिनिना अष्टाध्याय्याम् कारकस्य आलोचनं प्राम्यते अपादानकारकतः (ध्रुवमपायेऽपादानम्–1/4/24) एव। तदनन्तरं तेन क्रमेण सम्प्रदानं (कर्मणा यमभिप्रैति स सम्प्रदानम्– 1/4/32), करणं (साधकतमं करणम् – 2/4/42), अधिकरणं (आधारोऽधिकरणम् – 1/4/45), कम (कर्तुरीप्सिततमं कर्म – 1/4/49) कर्ता च कर्तृकारकस्य वा (स्वतन्त्रः कर्ता – 1/4/54) सूत्राणि प्रणीतानि। परन्तु वैयाकरण–शिरोमनिणा भट्टोजिदीक्षितेण सुप्–विभक्तेः क्रमविन्यासानुसारेण कृतकारकादारभ्य अधिकरणकारकं यावत् अर्थात् प्रथमाविभक्तितः सप्तमोविभक्तिं यावत् एवम्प्रकारेण कारक–विभक्तयोश्च आलोचनं कृतम्। संस्कृते 'सुपविभक्तिः' 'शब्दविभक्तिः' वा सप्त ''विभक्तयः सप्त'' ताश्च यथाक्रमं– प्रथमा– द्वितीया– तृतीया– चतुर्थी– पञ्चमी–षष्ठी–सप्तम्यः चेति। भाषातात्त्विकास्तु सम्बोधनविभक्तिम् आदाय अष्टौ विभक्तयः स्वीकुर्वन्ति। वस्तुतः सम्बोधनस्य विभक्तिः प्रथमाविभक्तेः तुल्यः। एतदर्थं संस्कृतवैयाकरणेन सम्बोधनस्य विभक्तिं पृथग्रूपेण नोक्तम्।

वाक्ये क्रियापदेण सह विवधस्य पदस्य अन्वयं (मुख्यः गौणः वा सम्बन्धः) कारकम् इत्युच्यते। तदुक्तञ्च भट्टोजिदीक्षितेण 'प्रौढमनोरमायाम्'– 'कारकम् इत्यस्य क्रियात्वयि इत्यर्थ इति' अर्थात् ''क्रियान्वयि कारकम्'' इति। वाक्ये क्रियापदेण सह विविधस्य पदस्य षड्विधाः सम्बन्धाः भवितुं शक्यन्ते। ते खलु सन्ति कर्तृसम्बन्धः, कर्मसम्बन्धः, करणसम्बन्धः, सम्प्रदानसम्बन्धः, अपादानसम्बन्धः अधिकरणसम्बन्धश्चेति। एतेभ्यः षड्विधेभ्यः सम्बन्धेभ्यः कर्तृकामादोति षड्विधंति कारकानि भवन्ति। संस्कृतव्याकरणे षड्विधेषुः कारकेषुः षड्विधाः विभक्तयः निर्दिष्टं वतन्ते। ताः सन्ति– कर्तृकारके प्रथमाविभक्तिः (प्रातिपदिकार्थ– लिङ्– परिमाण– वचनमात्रे प्रथमा – 2/3/46), कर्मकारके द्वितीया विभक्तिः (कर्मणि द्वितीया – 2/3/2), करणकारके तृतीया विभक्तिः (कर्तृकरणयोस्तृतीया – 2/3/18), सम्प्रदानकारके चतुर्थी विभक्तिः (चतुर्थी सम्प्रदाने – 2/3/13), अपादान कारके पञ्चमी विभक्तिः (अपादाने पञ्चमी – 2/3/28) अधिकरणकारके च सप्तमी विभक्तिः (सप्तम्यधिकरणे च – 2/3/36)।

व्याकरणशस्त्रे यत्र यत्र यत्यत् कारकं निर्दिष्टं वर्तते, तत्र तत्र विवक्षावशात् अन्यानि अपि कारकानि भवितुं शक्यन्ते। तदुच्यते च क्रमदोश्वरप्रणोते संक्षिप्तसारनामके व्याकरणे तथा वैयाकरणगणेन– ''विवक्षावशात् कारकाणि भवन्ति''। अत्र 'विवक्षा' इत्यस्य शब्दस्यार्थोऽरित प्रसिद्धकवेः पण्डितस्य वा इच्छा, न तु अकविजनस्य इच्छा भवति। यदि यस्य कस्यचित्वक्तुः इच्छां वुध्यात्, तर्हि कारकस्य नियमानां न प्रयोजनं स्यात्। महाभाष्यकारेण पतञ्जलिना करणे अधिकरणे च विवक्षितकर्तृत्वस्य उदाहरणरूपेण उक्तम् – ''स्थाली पचतीति... अधिकरणस्य कर्तृत्वम्।..... काष्ठानि पचन्तीति.... करणस्य कर्तत्वम्।'' (आह्निकं–3 पा.सू. –1/4/23)। अधिकरणस्य करणत्वविवक्षा प्रसङ्ग वाक्यपदोयग्रंथ भर्तृहरिणा लिखितं–

> वस्तुत स्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।
>
> स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यतः।।

इह तु न हि केवलं करणस्य कर्तृत्वविवक्षा अथवा अधिकरणस्य कतृत्वविवक्षा करणत्व विविक्षा वा विवक्षाविशेषेण कर्तृकर्मादिकारकेषु अन्यदपिकारकं भवितुं शक्यते। अधुना तानि विवक्षितस्थानानि अधस्तादुल्लिख्यन्ते –

कर्मादिकारकेषु कर्तृत्वविवक्षा प्रथमा विभक्तिः वा – कर्तृवाच्ये कर्तृकारके कर्तरि वा प्रथमा भवति। वस्तुतस्तु अभिहिते उक्ते वा सति कर्तृकर्मादिकारकेषु प्रथमा विभक्तिः भविष्यति। कर्तृवाच्ये कर्ता अभिहित उक्तः वा स्यात्। यत् किमपि कारकम् अभिहिते सत्येव प्रातिपदिकार्थे प्रथमा भविष्यति। सामान्यतया एताः विभक्तीः 'अभिहिते प्रथमा' इत्युच्यते। कर्तरि अर्थात् कर्तृकारके प्रथमा भविष्यति– इत्थं किमपि सूत्रं नास्ति व्याकरणशास्त्रे। 'बालकः चन्द्रं पश्यति' इत्यत्र कर्तृवाच्ये 'बालकः' इति पदं दृश्धातोः 'तिप्' प्रत्ययेन उक्तत्वात् 'बालकः' इत्यस्मिन् पदे उक्तःकर्तरि प्रातिपदिकार्थे प्रथमा स्यात। 'उक्त' इत्यस्य अर्थोऽस्ति धातोः तिप्, तस् अन्ति इत्यादि प्रत्ययैः अन्येन केनचित् कर्ता कर्म वा निर्दिष्टं स्यात। कर्तृवाच्ये कर्तरि या प्रथमा सा तु पाणिनिसम्मता ''प्रातिपदिकार्थमात्रे प्रथमा'' एव। यथा– बालकः गच्छति। पक्षान्तरे 'अनभिहिते' (2/3/1) इत्यस्य सूत्रस्य अधिकारस्थं कर्मादिकारकम् अभिहिते सत्येव द्वितीयादि विभक्तयः भवन्ति। केवलन्तु प्रातिपदिकार्थादिकम् अभिहितत्वादेव न प्रथमा स्यात, कर्म–करण–सम्प्रदान–अपादान–अधिकरणान्यपि कारकानि अभिहिते सत्येव प्रथमा स्यात्। अभिहितकर्तारम् 'उक्तकर्ता' इत्युच्यते। अनभिहितकर्तारञ्च 'अनुक्तकर्ता' इत्यच्यते।

'कर्मणि द्वितीया' (2/3/2) इति सुत्रेण कर्तृवाच्ये कर्मणि कर्मकारक वा द्वितीया विभक्तिः भवति। अपितु कर्मवाच्ये कर्म उक्तत्वात् प्रथमा विभक्तिः स्यात। यथा– शिशुना चन्द्रः दृश्यते। इह कर्म 'चन्द्रः' उक्तत्वात् 'अभिहिते प्रातिपदिकार्थे कर्मणि प्रथमा' सञ्जाता। 'कतुरीप्सिततमं कर्म' (1/4/49) चेति सुत्रेण 'चन्द्रः'– इति पदस्य कर्मत्वं विहितमस्ति। कर्ता च 'शिशुः' अनुक्तत्वात् 'कर्तृकरणयोस्तृतोया' इति सूत्रेण तृतिया स्यात।

करणकारक 'कर्तृकरणयोस्तृतीया' (2/3/18)' इति सूत्रेण तृतीया विभक्तिः भवति। करणस्य तु कर्तृत्वविवक्षायां सत्यां तत्र प्रथमा विभक्तिः भविष्यति। यथा– परित्राणाय साधुनामसिश्छिनत्ति दुष्कृतम्। करणम् 'असि' उक्तत्वात् अभिहिते प्रातिपदिकार्थे करणे प्रथमा विभक्तिः स्यत। 'साधकतमं करणम्' (1/4/42) चेति सूत्रेण 'असि' इत्यस्य करणत्वमस्ति।

'चतुर्थी सम्प्रदाने' (2/3/13) इति सूत्रेण सम्प्रदानकारके सामान्यतया चतुर्थी विभक्तिः भवति। परन्तु सम्प्रदानस्य अविवक्षायां कर्तृत्वविवक्षायां सत्यां सम्प्रदाने चतुर्थ्याः स्थले प्रथमा विभक्तिः भवति। उदाहरणमस्ति– 'दानीयः स द्विजः सवैर्यस्यास्ति हृदयं महत्'। अत्र अभिहिते सम्प्रदाने प्रथमा। 'कर्मणा यमभिप्रैति स सम्प्रदानम्' (1/4/32) चति सूत्रेण 'द्विज' पदास्य सम्प्रदानत्वं वर्तते।

अपादानकारक 'अपादाने पञ्चमी' (2/3/28) इति सूत्रेण पञ्चमी विभक्तिः भवति। किन्तु अपादानस्य कर्तृत्वविवक्षायां सत्यां तत्र प्रथमा विभक्तिः भवत्येव। यथा–– 'दुर्जनो नैव भतव्यो भये स्यात्तस्य साहसम्।' इत्यस्मिन् उदाहरणे अपादानं 'दुर्जनः' इत्यस्मिन् पदे अभिहिते अपादाने प्रथमा विभक्तिः सञ्जाता। 'भीत्रार्थानां भयहेतुः' (1/4/25) चति सूत्रेण 'दुर्जनः' इत्यस्य अपादानत्वं वर्तते।

'सप्तम्यधिकरणे च' (2/3/36) इति सूत्रेण अधिकरणकारके सप्तमी विभक्तिः भवति। परन्तु अधिकरणस्य अविवक्षायां कर्तृत्वविवक्षायां सत्या तत्र प्रथमा विभक्तिः स्यात। यथा– स्थाली पचति। अत्र अभिहिते अधिकरणे प्रथमा। 'आधारोऽधिकरणम्' (1/4/45) चति सूत्रेण 'स्थाली' इत्यस्य आधारत्वं विहितमस्ति।

करणादिकारकेषु कर्मत्वविवक्षा द्वितीया विभक्तिः वा– कर्तृकारके कर्तरि वा कर्मत्व–विवक्षायाः उदाहरणं न दृश्यते। कर्मणि कर्मकारके वा 'कर्मणि द्वितीया' (2/3/2) इति सूत्रेण द्वितीया विभक्तिः भवति। यथा– छात्रः दर्शनशास्त्रं पठति। इत्यस्मिन् उदाहरणे 'कर्तुरीप्सिततमं कर्म' (1/4/49) इति सूत्रेण 'दर्शनशास्त्रम्' इत्यस्य कर्मत्वसंज्ञा। ततः 'कर्मणि–' (2/3/2) इति सूत्रेण द्वितीया विभक्तिः सञ्जाता। इत्थं कर्मत्वविवक्षा करणादिकारके–

करणस्य कर्मत्वविवक्षायां सत्यां तत्र द्वितीया विभक्तिः भविष्यति, न तु 'कर्तृकरणयोस्तृतीया' (2/3/18) इति सूत्रेण तृतीया स्यात्। (अक्षैः) अक्षान् दिव्यति– उदाहरणमिदं 'दिवः कर्म च' (1/4/43) इति सूत्रेण दिव् धातोः करणकारकं विकल्पेन कर्मत्वं संज्ञा प्राप्यते। ततश्च 'कर्मणि–' इति सूत्रेण द्वितीया विभक्तिः भवति। 'अकथितञ्च' (1/4/51) इति सूत्रेण करणेऽपि कर्मत्वम् उल्लिखितम् अर्थात् करणस्य अविवक्षायां कर्मत्वं स्यात्। उदाहरणमस्ति– पाचकः तण्डुलान् (तण्डुलैः – करणं) ओदनं पचति। इत्यस्मिन् उदाहरणे पाचकः तण्डुलान् (तण्डुलात्) ओदनं पचति – एवम् अपादानेऽपि कमत्वं भवितुं शक्यते।

सम्प्रदानस्य कर्मत्वविवक्षायां सत्यां तत्र 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः भविष्यति। तदा तत्र 'चतुर्थी सम्प्रदाने' (2/3/13) इति सूत्रेण सम्प्रदानकारके चतुर्थी विभक्तिः न भविष्यति। सम्प्रदाने कर्मत्वस्य उदाहरणम्– गुरुः शिष्यं (शिष्याय–सम्प्रदानम्) धर्मं ब्रूते शस्ति वा। इत्यस्मिन् उदाहरणे 'अकथितञ्च' (1/4/51) इति सूत्रेण सम्प्रदानस्य अविवक्षायां अकथिते, अप्रधाने गौणे वा कर्मणि 'शिष्यम्' इत्यस्मिन पदे द्वितीया विभक्तिः सञ्जाता। उदाहरणे 'धर्मं' ईप्सिततमत्वात् कर्म मुख्यकर्म वार्ता। 'शिष्यम्' इति पदे सम्प्रदानस्य अविवक्षा अवश्यकर्तव्या, न तु वैकल्पिका। 'क्रुध् द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः' (1/4/37) इति सूत्रेण क्रुध् द्रुह् चेति धात्वोः द्वयस्य योगात् सम्प्रदानत्वम् उल्लिखितम्। किन्तु 'क्रुध–द्रुहोरुपसृष्टयोः कर्म' (1/4/38) इति सूत्रेण क्रुध् द्रुह् चेति धातू उपसर्गयुक्तत्वात् तत्र सम्प्रदाने कर्मत्वसंज्ञा स्यात्। यथा– क्रुरमतिक्रुध्यति, क्रुरमभिद्रुह्यति। उपसर्गाभावात्तु सम्प्रदानत्वम् – क्रुराय क्रुध्यति द्रुह्यति वा।

'अपादाने पञ्चमी' (2/3/28) इति सूत्रेण अपादानकारके पञ्चमी विभक्तिः भवति। किन्तु अपादानस्य कर्मत्वविवक्षायां सत्यां तत्र द्वितीया विभक्तिः स्यात्, न तु पञ्चमी। 'अकथितञ्च' (1/4/51) इति सूत्रेण अपादानस्य अविवक्षायां गौणकर्मे द्वितीया विभक्तिः भवति। यथा– गोपो गां (गोः – अपादानं) दुग्धं दोग्धि, वामनः वलिं (वलेः – अपादानं) वसुधां याचते, बालिका वृक्षं (वृक्षात् – अपादानं) पुष्पं चिनोति, शिष्यः गुरुं (गुरोः – अपादानं) धर्मं पृच्छति, राजा चौरं (चौरात्–अपादानं) शतं दण्डति (गृह्णाति), देवदत्तः यज्ञदत्तं (यज्ञदत्तात्–अपादानं) शतं जयति, देवगणः समुद्रं (समुद्रात् – अपादानं) अमृतं मथ्नाति, चौरः देवदत्तं (देवदत्तात् – अपादानं) शतं मुष्णाति। एतेषु उदाहरणेषु दुह्, याच्, चि, प्रच्छ्, दण्ड, जि, मन्थ् मुष् चेति द्विकर्मकधातुयोगात् यथाक्रमं गाम, वलिम्, वृक्षम्, गुरुम्, चौरम्, यज्ञदत्तंम्, समुद्रम् देवदत्तञ्चेति गौणकर्मषु अपादानस्य अविवक्षायां कर्मणि द्वितीया सञ्जाता।

गोपः गां व्रजं (व्रजे–अधिकरणं) रुणद्धि, गोपः गां गृहं (गृहे) नयति, वालकः अजां ग्रामं (ग्रामे) हरति, भृत्यः ग्रामं (ग्रामे) भारं वहति, कृषीवलः भूमिं (भूमौ) शस्यं कर्षति। एषु उदाहरणेषु यथाक्रमं व्रजं, गृहं, ग्रामं, ग्रामं भूमिञ्चेति गौणकर्मेषु अधिकरणस्य अविवक्षायाम् 'अकथिञ्चति सूत्रेण कर्मत्वसंज्ञा। ततश्च 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः सञ्जाता।

'अधिशीङ्स्थासां कर्म' (1/4/46) इति सूत्रेण अधि–उपसर्गयोगात् आधारस्य अधिकरणस्य वा कर्मसंज्ञा स्यात्। यथा– शिशुः शय्याम् अधिशेते, कृष्णः द्वारकाम् अधितिष्ठति, नृपः सिंहासनम् अध्यस्ते। 'अभिनिविशश्च' (1/4/47) इति सूत्रेणापि आधारस्य कर्मत्वसंज्ञा स्यात्। उदाहरणमस्ति– साधुः सन्मार्गम् अभिनिविशते। अत्र अभि नि चेति उपसगौ द्वौ सम्मिलितरूपेण विशधातोः प्राक् संयुक्तत्वात् विश्धातोः आधारः कर्मत्वं प्राप्यते। अपिच 'उपान्वध्याङ् वसः' (1/4/48) इति सूत्रेणापि उप, अन, अधि आङ् चेति उपसर्गयोगात् वस्धातोः आधारस्य कर्मत्वविवक्षा दृश्यते। यथा– हरिः वैकुण्ठम् उपवसति, वालकः नगरम् अनुवसति, नृपः राजधानीम् अधिवसति, छात्रः गुरुकुलम् आवसति।

'अकर्मक धातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यमि' ति वार्तिकनियमेन केवलम् अकर्मकस्वधातुयोगात् देशविशेषस्य नाम्नि अधिकरणस्य अविवाक्षायां कर्मसंज्ञा भवति। यथा– कुरुन् स्वपिति, इत्यस्मिन् उदाहरणे निद्राविषये कुरुदेशः निद्राकर्तुः ईप्सिततमत्वात् 'कर्तुरीप्सिततमं कर्म' इति सूत्रेण 'कुरुन्' इत्यस्य कर्मत्वम् ततश्च 'कर्मणि द्वितीया' इति सूत्रेण द्वितीया विभक्तिः सञ्जाता।

कर्तृकर्मादिकारकेषु करणत्व विवक्षा तृतीया विभक्तिः वा– कर्तृवाच्ये कर्ता अभिहितत्वात् तत्र प्रादिपदिकार्थे प्रथमा स्यात्। अपितु कर्मवाच्य–भाववाच्ययोः कर्ता अनुक्तत्वात् तत्र 'कतृकरणयोस्तृतीया' (2/3/18) इति सूत्रेण तृतीया विभक्तिः स्यात्। कर्तरि तृतीयाम् अनुक्ते कर्तरि तृतीया अपि उच्यते। यथा– मया चन्द्रः द्रष्टव्यः दृश्यते वा। अत्र 'मया' इत्यस्मिन् पदे अनुक्ते कर्तरि तृतीया जाता। प्रयोज्यकर्तरि च 'साधकतमं करणमं'– (1/4/42) इति सूत्रेणपि करणत्वं ततश्च 'कर्तृकरणयो–' इति सूत्रेण तृतीया स्यात्। यथा– प्रभुः भृत्येन कार्यं कारयति। 'भृत्येन' पदमिदं प्रयोज्यकर्ता। वक्तुमुचितं यत्, 'प्रभुः' पदमिदं हेतुकर्ता प्रयोजककर्ता वा। 'संज्ञोऽन्यतरस्यां कर्मणि' (2/3/22) इति सूत्रेण सम्पूर्वकात् ज्ञाधातोः कर्म कर्मकारकं वा विकल्पेन तृतीया विभक्तिः स्यात्। उदाहरणमस्ति– पित्रा (पितरं) संजानीते।

सामान्यतः क्रियासिद्धौ प्रकृष्टोपकारकत्वात् कारकं 'साधकतमं करणम्' (1/4/42) इति सूत्रेण करणसंज्ञा प्राप्यते। यथा– चक्षुषा पश्यति, कर्णेन शृणोति, विमानेन गच्छति इत्यादयः। चक्षुषा, कर्णेन, विमानेन इत्येतेषु पदेसु 'साधकतमं'– (1/4/42) इति सूत्रण करणत्वं ततश्च 'कतृकरणयो–' (2/3/18) इति सूत्रेण तृतीया सञ्जाता।

''अशिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया'' – इति वार्तिकात् सम्प्रदाने चतुर्थ्याः स्थले तृतीया विभक्तिः लक्ष्यते। उदाहरणमस्ति – दास्या संयच्छते कामुकः। कामुकेन दानं अशिष्टव्यवहारत्वात् 'दास्या' इत्यस्मिन् पदे समप्रदाने तृतीया विभक्तिः जाता।

अपादानकारके तृतीया करणत्वं वेति विषये किमपि पाणिनिशब्दशास्त्रसम्मतं सूत्रं नियमः वा न दृ श्यते। अपिच, पाणिनिनियमात् वहिः प्रसिद्धकविप्रयोगोऽपि न लक्ष्यते।

'नक्षत्रे च लुपि' (2/3/35) इति सूत्रेण अधिकरणे तृतीया–सप्तम्यौ विभक्ती भवतः। अर्थात् तृतीयां विना विकल्पेन सप्तम्यपि भुवितुं शक्यते। उदाहरणमस्ति– मूलेण (मूले) आवाहयेद देवीं श्रवणेन (श्रवणे) विसर्जयेत। अत्र मूलं श्रवणञ्चेति शब्दौ द्वौ नक्षत्रवाचकौ वर्तेते।

कर्तृकर्मादिकारकेषु सम्प्रदानत्वविवक्षा चतुर्थी विभक्तिः वा– सम्प्रदानकारके 'चतुर्थी सम्प्रदाने' (2/3/13) इति सूत्रेण चतुर्थी विभक्तिः स्यात्। अपितु सम्प्रदानं विना कारकान्तराणामपि सम्प्रदानत्वविवक्षायां सत्यां तत्रापि 'चतुर्थी–' (2/3/13) इति सूत्रेण चतुर्थी विभक्तिः प्राप्यते। सम्प्रदानत्वविवक्षितानि कारकानि क्रमेण उच्यन्ते–

'प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता' (1/4/40) इति सूत्रेण प्रवर्तनारूपव्यापारस्य कर्तरि सम्प्रदानं स्यात्। इदृशं कारकं प्रवर्तनाकर्तरि सम्प्रदानकारकम् इति उच्यते। यथा– राजा विप्राय गां प्रतिशृणोति आशृणोति वा। अत्र 'विप्राय' इति पदं पूर्वस्य प्रवर्तनारूपव्यापारस्य कर्ता। अतः तत्र सम्प्रदानत्वं ततश्च 'चतुर्थी–' (2/3/13) इति सूत्रेण चतुर्थी विभक्तिः स्यात्।

कर्मणि चतुर्थीविभक्तेः विषये पाणिनः पृथक् पृथक् त्रीणि सूत्राणि लक्ष्यन्ते। तानि च सन्ति– (1) 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' (2/3/14) इति सूत्रेण तमुन्–प्रत्ययान्त–क्रिया उह्यत्वात् तस्याः कर्मणि चतुर्थी स्यात्, न तु सम्प्रदानत्वम्। यथा– नृसिंहाय (नृसिंहमनुकुलयितुम्) नमस्कुर्मः, वालकः फलेभ्यः (फलानि आहर्तुम्) उद्यानं याति। (2) 'मन्यकर्मण्यनादरे विभाषाऽप्राणिषु' (2/3/17) इति सूत्रेण दिवादिगणीयस्य मन्धातोः अनादरसूचके कर्मणि विकल्पेन चतुर्थी विभक्तिः भवति। यथा– अहं त्वां तृणाय (तृणम्) न मन्ये। (3) 'गत्यर्थकर्मणि द्वितीया चतुर्थ्यौ चेष्टायामनध्वनि' (2/3/12) इति सूत्रेण चेष्टार्थे ((Bodily effort or movement) गमनार्थकधातोः कर्मणि विकल्पेन चतुर्थी स्यात्। यथा– रामः ग्रामाय (ग्रामं) गच्छति।

'परिक्रयणे सम्प्रदानमन्यतरस्याम्' (1/4/44) इति सूत्रेण करणकारकं विकल्पेन सम्प्रदानसंज्ञा प्राप्यते। यथा– भृत्यः शताय (शतेन) परिक्रीतः।

अपादाने चतुर्थी सम्प्रदानत्वं वा प्रसङ् पाणिनः कोऽपि नियमः प्रसिद्धप्रयोगः वा न दृश्यते।

गत्यर्थकधातोः कर्मणि आधारे अधिकरणे वा द्वितीया–चतुर्थ्यौ स्तः; न तु सप्तमी विभक्तिः। यथा– रविः ग्रामाय (ग्रामं) गच्छति, ब्राह्मणः गृहाय (गृहं) गच्छति। अत्र ग्रामं गृहञ्चेति दौ पदौ युगपत् कर्म अधिकरणञ्चेति। तत्र 'गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ'– (2/3/12) इति सूत्रेण गमनार्थकधातोः कर्मणि द्वितीयां विना विकल्पेन चतुर्थी अपि भवितुं शक्यते।

कर्मादिकारकेषु अपादानत्वविवक्षा पञ्चमी विभक्तिः वा– अपादानकारके– 'अपादाने पञ्चमी' (2/3/28) इति सूत्रेण पञ्चमी विभक्तिः स्यात्। अपादानं विना कर्म–करण–अधिकरणकारकेषु अपि पञ्चमी विभक्तिः दृश्यते।

'ल्यव्लोपे कर्मण्यधिकरणे च' इति वार्तिकसूत्रेण ल्यप्प्रत्ययान्ता क्रिया उह्यत्वात् तस्याः कर्मणि पञ्चमी स्यात्। यथा– श्वशुरात् (श्वशुरं वीक्ष्य) जिह्रेति नवोढा वधुः। किञ्च 'ल्यव्लोप–' इति वार्तिकसूत्रेण अधिकरणेऽपि पञ्चमी लक्ष्यते। यथा– आसनात् (आसने उपविश्य) प्रेक्षते राजा। अत्र ल्यप्प्रत्ययन्ता क्रिया (उपविश्य) ऊह्यत्वात् तस्याः अधिकरणे (आसने) पञ्चमी विभक्तिः जाता।

स्तोक–अल्प–कृच्छ्र–कतिपयाः शब्दाः यदा विशेष्यरूपेण प्रयुज्यते, तदा एतत्शब्दानामुत्तरं करणकारके विकल्पेन तृतीयापञ्चम्यौ स्तः। यथा– स्तोकाद् (स्तोकेन) मुक्तः (saved easily or narrowly)। अस्मिन् विषये सूत्रमस्ति– 'करणे च स्तोकाल्प–कृच्छ्र–कतिपयस्यासत्त्वेवचनस्य' (2/3/33)।

कतृसम्प्रदानयोश्च अपादानत्वं पञ्चमी विभक्तिः वा प्रसङ् कोऽपि प्रसिद्धकविप्रयोगः पाणिनीयसूत्रं वा न दृश्यते।

कर्तृकर्मादिकारकेषु अधिकरणत्वविवक्षा सप्तमी विभक्तिः वा– सामान्यतया 'सप्तम्यधिकरणे च' (2/3/36) इति सूत्रेण अधिकरणकारके ('आधारोऽधिकरणम्' 1/4/45) सप्तमी विभक्तिः स्यात्। परन्तु अधिकरणं विना अन्येषु कारकेषु अपि अधिकरणत्वं सप्तमी वा विवक्षा भवितुं शक्यते। अधुना तानि स्थानानि उच्यन्ते–

'यस्य च भावेन भावलक्षणम्' (2/3/37) 'षष्ठी चानादरे' (2/3/38) चेति द्वाभ्यां सूत्राभ्यां कर्तरि कर्मणि च सप्तमी विभक्तिः स्यात्। 'षष्ठी चानादरे' इति सूत्रेण विकल्पेन कर्तरि कर्मणि च षष्ठी अपि भवितुं शक्यते। भावे कर्तरि सप्तमी – ब्राह्मणेषु अधियानेषु विष्णुमित्रः गतः। भावेकर्मणि सप्तमी – गोषु दुह्यमानासु देवदत्तः गतः। अनादरे कर्तरि सप्तमी– रुदति (रुदतः) पुत्र (पुत्रस्य) पिता प्राव्राजीत्। अनादरे कर्मणि सप्तमी– पश्यति (पश्यतः) मयि (मे) वालकः श्येनेन अपहृतः।

''अर्हाणां कर्तृत्वेऽनर्हानामर्तृत्वे तद्वैपरीत्ये च'' इति वार्तिकसूत्रेणपि कर्तरि सप्तमो स्यात्। यथा– सत्स तिष्ठत्सु असन्तस्तरन्ति, असत्सु तरत्सु सन्तस्तिष्ठन्ति।

''क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्'' इति वार्तिकसूत्रेण इन्प्रत्ययस्य विषयः यः 'त्त'– प्रत्यन्तः शब्दः, अस्य कर्मणि (अनुक्ते) सप्तमी स्यात्। यथा– अधीति व्याकरणे। 'किम् अधीतवानिति कर्मविशेषजिज्ञासायां व्याकरणम् अध्ययने कर्मत्वेनान्वेति' इति बालमनोरमा।

करणे अधिकरणत्वं सप्तमी विभक्तिः वा विषये किमपि उदाहरणं न दृश्यते।

सम्प्रदान अधिकरणत्वविवक्षा दृश्यते। यथा– 'कौन्तेय, मा प्रयच्छेश्वर धनम्'। अत्र प्रसिद्धकविप्रयोगत्वात् दानक्रियायाः कर्मणि (ईश्वरे) अधिकरणविवक्षा समर्थनीया। अपिच, 'अरौ कुपितः शान्तः सह्यशान्तो दुर्मनायते' इति प्रसिद्धप्रयोगेऽपि सम्प्रदानत्वं लक्ष्यते।

''सप्तमी–पञ्चम्यौ कारकमध्ये'' (2/3/7) इति सूत्रेण अपादान विकल्पेन सप्तमी दृश्यते। यथा–– इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत्।

कर्त्रादिकारकेषु सम्बन्धविवक्षा षष्ठी विभक्तिः वा– 'षष्ठो चानादरे'– सूत्रेण कर्तरि षष्ठो स्यात् इतः पूर्वं तदुक्तम्। 'कृत्यानां कर्तरि वा' (2/3/71) इति सूत्रेण कृत्यप्रत्यययोगात् (तव्य–अनीय–यत्–ण्यत्–क्यप् प्रभृतयः) अनुक्ते कर्तरि तृतीयां विना विकल्पेन षष्ठी अपि भवितुं शक्यते। यथा– मम (मया) सेव्यो हरिः। 'कर्तृकर्मणोःकृति' (2/3/65)– इति सूत्रेण कृद्योगात् (घञ्–क्तिन्–ल्युट् इत्यादयः प्रत्ययाः) अनुक्ते कर्तरि षष्ठी स्यात्। यथा– कृष्णस्य कृतिः, शिशोः शयनम्। अस्मिन् स्थले समासोऽपि भवितुं शक्यते।

'अधिकरणवाचिनश्च' (2/3/68)– इति सूत्रेण कर्तरि षष्ठी विभक्तिः स्यात्। यथा, अनुक्ते कर्तरि षष्ठी– इदमेषाम् आसितम् शयितं वा।

कर्मणि कर्मकारके वा षष्ठी विभक्तेः कृते पाणिनिना चतुर्दश सूत्राणि उक्तानि। तानि (1) 'कृत्यानां कर्तरि वा' (2/3/71), (2) 'कर्तृ–कर्मणोः कृति' (2/3/65), (3) उभय–प्राप्तौ कर्मणि (2/3/66), (4) क्तस्य च वर्तमाने (2/3/67), (5) 'अधीगर्थदयेशां कर्मणि' (2/3/52), (6) 'कृञः प्रतियत्ने' (2/3/53), (7)'रुजार्थानां भाववचनानामज्वरेः'(2/3/54), (8)'आशिषि नाथः'(2/3/55), (9) जासिनिप्रहणनाटक्राथपियां हिंसायाम् (2/3/56), (10) 'व्यवहृपणोः समर्थयोः' (2/3/57), (11) 'दिवस्तदर्थस्य' (2/3/58), (12) 'विभाषोपसर्गे' (2/3/59), (13) अधिकरणवाचिनश्च (2/3/68), 14. 'प्रेष्य–ब्रुवोर्हविषो देवता सम्प्रदाने' (2/3/61) चेति। एतानि सूत्राणि अवगन्तुम् अष्टाध्यायी, वैयाकरणसिद्धान्तकौमुदी काशिकादिग्रन्थाश्च अवश्यमेव द्रष्टव्याः विस्तारभिया नात्र प्रस्तुयन्ते।

''ज्ञोऽविदर्थस्य करणे'' (2/3/51) इति सूत्रेण ज्ञाधातोः अविदर्थस्य करणे सम्बन्धमात्रविवक्षया षष्ठी विभक्तिः भवति। यथा– तैले सपिषः ज्ञानीते। शेषत्वेन न विवक्षिते– तैले सर्पिषा (घृतेन वा) प्रवर्तते। 'पूरण–गुण–सहितार्थ–सदव्यय–तव्य–समाधिकरणेन' (2/2/11) इति सूत्रेण सुहितार्थे अर्थात् तृप्त्यर्थे एव करणकारके शेषविवक्षया षष्ठी स्यात्। यथा– नाग्निस्तृप्यति काष्ठानाम्।

हितोपदेशे उक्तं– 'अज्ञातकुलशीलस्य वासो देयो न कस्यचित्'। अत्र सम्प्रदाने सम्बन्धमात्रविवक्षया षष्ठी जाता तदुक्तञ्च वैयाकरणसिद्धान्त कौमुद्याम् 'कर्मादीनामपि सम्बन्धमात्रविवक्षया षष्ठ्येव' इति।

अपादाने षष्ठीविवक्षाविषये पाणिनेः अष्टाध्याय्यां किमपि सूत्रं न दृश्यते। परन्तु प्रसिद्धकविना अपादाने शेषविवक्षा कृता। यथा– 'तावद्भयस्य भेतव्यं यावद् भयमनागतम्'। इह 'भीत्रार्थानां भयहेतुः' (1/4/25) इति सूत्रेण 'भयात्' भवितुमूचितम् आसीत्।

पाणिनिः एकेन सूत्रण अधिकरणे षष्ठ्याः विभक्तेः निर्देशः कृतवान्– 'कृत्वोऽर्थप्रयोगे का लेऽधिकरणे' (2/3/64) इति सूत्रेण वारार्थक–प्रत्ययान्त–शब्दयोगे कालाधिकरणे सम्बन्धमात्रविवक्षया षष्ठी विभक्तिः स्यात्। यथा– अह्नः पञ्चकृत्वः भुङ्क्ते।

वस्तुतस्तु कारकं विभक्तिश्च नैव तुल्ये। वाक्ये उपयोगकृतस्य अर्थस्य दृष्टिकोणतः सुपविभक्तोनां त्रिधा प्रयोगः संस्कृतभाषायां दृश्यते। यथा– कारकविभक्तिः, शब्दविभक्तिः विशेषार्थविभक्तिश्चेति। सु–औजसादिविभक्तिभिः शब्दस्य निजार्थम् अन्तरेण एकम् अन्तःस्थार्थान्तरमपि द्योत्यते। विभक्तेः एषः अन्तःस्थ–अर्थरेव कर्तारं कर्म–करण–सम्प्रदानादिभ्यः पृथक् क्रियते। तेन कतृ–कर्म–करणादिकारकेषु निर्दिष्टविभक्तिं विना अन्याः विभक्तयः प्रयुक्ते सत्यपि कर्तृत्व–कर्मत्वादिकं कारकत्वं न नश्यते। एवंविधं प्रयोगं कर्तरि सम्प्रदानत्वं, करणे कर्मत्वं, सम्प्रदानत्वं वा इत्यादिसंज्ञया अभिधीयते। अपिच, यत्र कारकत्वं नास्ति, तत्र कर्मणि तृतीया, कर्तरि षष्ठी, करणे षष्ठी इत्यादिसंज्ञया अभिधोयते। अतिविस्तरेणालम्।

परिशीलितग्रन्थसूची–


1. पस्पशाह्निकम्– टीकाकारः सम्पादश्च शशिभूषणमिश्रः, वि.एन. पब्लिकेशन्, कोलकाता, प्रथमप्रकाशः, 2018
2. अष्टाध्यायोसूत्रपाठः, सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भण्डार, कोलकाता, 12 वैशाख, 2012
3. वाक्यपदीयम, पण्डित श्री रघुनाथ शर्मा, सम्पूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी, 1997
4. काशिका– वामनजयादित्य, तारा प्रिन्टिस बुक्स, 1985
5. शब्दकौस्तुभः, भट्टोजि दीक्षित (1–3 भाग), चौखम्भा संस्कृत सीरीज ऑफिस, वाराणसी, 1991
6. वैयाकरणसिद्धान्तकौमुदी – भट्टोजीदीक्षितः, मोतीलाल बनारसीदास, 2010
7. महाभाष्यम् – पतञ्जलि, मोतिलाल बनारसीदास, 1967
8. अष्टाध्यायी – पाणिनिः, वलरामप्रकाशनी, 2003
9. व्याकरण–दर्शनेर् इतिहास गुरुपदः हालदार, संस्कृत बुक् डिपो, 2006
10. काशिका – वामनजयादित्य, तारा प्रिन्टिस् बुक्स, 1985

11. व्याकरण–कौमुदी – ईश्वरचन्द्रछ विद्यासागरः, चट्टोपाध्याय ब्रादार्स, एकपञ्चाशत्तम संस्करणः (प्रकाशकाल अनुल्लिखित)
12. पाणिनीयम् – प्रबोधचन्द्र लाहिडी हृषीकेश शास्त्री, दि ढाका स्टुडेण्टस् लाइब्रेरी, कलकाता, 2006
13. पाणिनोय शब्द शास्त्र – ड. सत्यनारायण चक्रवर्ती, संस्कृत पुस्तक भाण्डार, 2003
14. कारक–प्रकरणं (भट्टोजीदीक्षितकृता वैयाकरण–सिद्धान्त कौमुदी) – ड. सच्चिदानन्द मुखोपाध्याय, साहित्य निकेतन, 2010–11
15. हितोपदेशः (मित्रलाभः) – नारायण शर्मा, श्रीवलरामप्रकाशनी, 2004